ॐ नमः शिवाय

शिवरात्रि पूजा

सामग्री एकत्रित होने तक श्रद्धा से ॐ नमः शिवाय मन्त्र पढते रहें। भद्रपीठ या थाली में 'सञ्पुतलू' अथवा 'पार्थिवेश्वर' रख कर नारीकचलू (अथवा) खोसू से पात्र में जलधारा डाल कर पढ़ें।

अस्यश्री आसनशोधनमन्त्रस्य मेरुपृष्ठ ऋषिः सुतलं छन्दः कूर्मो देवता आसनशोधने विनियोगः ॥

पृथिवी माता को तिलक फूल, चावल चढ़ा कर पढ़ें।

प्रीं पृथिव्यै आधारशक्त्यै समालभनं गन्धो नमः। अर्घो नमः। पुष्पं नमः ॥

हाथ जोड़ कर पढ़ें।

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥

दर्भ के दो तिनके अनामिका अङ्गुलियों में रख कर गणेश जी का ध्यान करते हुए पढ़ें।

(१) शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्। प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥ अभिप्रीतार्थसिद्ध्यर्थं पूजितो यः सुरैरपि। सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥

(२) कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम्। सदा रमन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ॥

(३) गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुः साक्षान्महेश्वरः। गुरुरेव जगत्सर्वं तस्मै श्रीगुरवे नमः ॥ गुरवे नमः। परम-गुरवे नमः। परमेष्ठगुरवे नमः। परमाचार्याय नमः। आदिसिद्धेभ्यो नमः ॥

इसी तरह दर्भ के दो तिनके पकड कर अङ्गन्यास कीजिये :—

ॐ यो रुद्रो अग्नौ हृदयाय नमः ।

हृदय को दोनों हाथों से छूते हुए पढ़ें, सिर को छूयें, चोटी को छूयें :—

यो अप्सु य ओषधीषु शिरसे स्वाहा । यो वनस्पतिषु शिखायै वषट् । यो रुद्रो विश्वा भुवना विवेश कवचाय हुम् (वस्त्रों को) । तस्मै रुद्राय नेत्राभ्यां वौषट् । (नेत्रों को) नमो अस्तु देवा अस्त्राय फट् ।

(चुटकी मारें) । अंगूठे को अंगुष्ठ,अंगूठे के साथ की उंगली को तर्जनी, दरमियानी उंगली को (याने तीसरी) मध्यमा, चौथी को अनामिका, पांचवी को (सब से छोटी) कनिष्ठा कहते हैं । चारों तरफ तिल फेंक कर पढ़ें :—

अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः । ये भूता विघ्न-कर्तारस्ते नशन्तु शिवाज्ञया ॥

प्राणायाम करके हृदय और मुख को जल के छींटे देकर पढ़ें ।

तीर्थे स्नेयं तीर्थमेव समानानां भवति, मानः शंस्यो अरुषो धूर्तिः प्राणङ् मर्त्यस्य रक्षाणो ब्रह्मणस्पते ।

अनामिका उंगली पर पवित्र धारण करते हुए पढ़ें :—

वसोः पवित्रमसि शतधारं वसूनां पवित्रमसि सहस्रधारम् । अय-क्ष्मा वः प्रजया संसृजामि रायस्पोषेण बहुला भवन्तीः ।

यजमान को तिलक लगा कर पढ़ें : —

मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः शत्रूणां बुद्धि-नाशोऽस्तु मित्राणामुदयस्तव आयु रारोग्यमैश्वर्यमेतत्त्रितयमस्तु ते जीव त्वं शरदश्शतम् ।

अपनी मध्यमा उंगली से अपने आप को तिलक और पुष्प लगा कर पढ़ें ।

परमात्मने पुरुषोत्तमाय पञ्चभूतात्मकाय विश्वात्मने मन्त्र-नाथाय आत्मने नारायणायाधारशक्त्यै समालभनं गन्धो नमः अर्घो

नमः पुष्पं नमः ।

दीप (चोंग) को तिलक, अक्षत और पुष्प चढावें :—

स्वप्रकाशो महादीपः सर्वतस्तिमिरापहः । प्रसीद मम गोविन्द दीपोऽयं परिकल्पितः ।

धूप को तिलक अर्घ और पुष्प चढाते हुए पढ़ें ।

वनस्पतिरसो दिव्यो गन्धाढ्यो गन्ध उत्तमः । आह्वानं सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ।

सूर्यदेवता को निर्मलथाल में अर्घ चावल फूल चढा कर पढ़ें :—

नमो धर्मनिधानाय । नमः स्वकृतसाक्षिणे नमः प्रत्यक्षदेवाय भास्कराय नमो नमः ।

दर्भ के विष्टर सहित पात्र से सञ्पुतलो पर जल डाल कर पढ़ें :—

यत्रास्ति माता न पिता न बन्धुर्भ्रातापि नो यत्र सुहृज्जनश्च । न ज्ञायते यत्र दिनं न रात्रिस्तत्रात्मदीपं शरणं प्रपद्ये ।। आत्मने नारायणायाधारशक्त्यै धूपदीप सङ्कल्पात्सिद्धिरस्तु धूपो नमः दीपो नमः ।

ॐ तत्सद्ब्रह्म अद्य तावत् तिथौ अद्य फाल्गुण-मासस्य कृष्णपक्षस्य तिथौ द्वादश्यां रविवासरान्वितायां महागणपतये कुमाराय श्रियै सरस्वत्यै लक्ष्म्यै विश्वकर्मणे दारदेवताभ्यः प्रजापतये ब्रह्मणे कलशदेवताभ्यः ब्रह्म-विष्णुमहेश्वर-देवताभ्यः चतुर्वेदेश्वराय सानुचराय मासपतये नारायणाय फाल्गुणे शक्तिसहिताय चक्रिणे क्रियासहिताय गोविन्दाय दुर्गायै त्र्यम्बकाय वरुणाय यज्ञपुरुषाय अग्निष्वात्तादिभ्यः पितृगणदेवताभ्यः भगवते भवाय 'देवाय, उग्राय, भीमाय देवाय ईशानाय देवाय, ईश्वराय देवाय, महादेवाय, पार्वतीसहिताय परमेश्वराय, देवीपुत्र-वटुकनाथाय, कालरात्र्यै

तालरात्र्यै राज्ञरात्र्यै, शिवरात्र्यै समस्तशिवरात्रिदेवताभ्यः धूपदीप संकल्पात्सिद्धिरस्तु धूपो नमः दीपो नमः।

अपसव्येन बायां यज्ञोपवीत रख कर तिल सहित पानी से पितरों को जल देते तीन बार पढ़ें।

नमः पितृभ्यः प्रेतेभ्यो नमो धर्माय विष्णवे। नमो यमाय रुद्राय कान्तारपतये-नमः ३। ॐ तत्सद्ब्रह्म अद्य तावत् तिथौ अद्य।

इस के बाद जैसे आप तर्पण करते हैं :—

पित्रे पितामहाय प्रपितामहाय। मात्रे पितामह्यै प्रपितामह्यै इत्यादि समस्तमातापितृभ्यो द्वादशदैवतेभ्यः पितृभ्यो धूपस्वधा दीपस्स्वधा।

सव्येन : दाईं भुजा में यज्ञोपवीत धारण कर के विष्टर और जल से पूर्ण खोसू या नारीकचलो में (इसको धारापात्र भी कहते है) तिलक और तीन पुष्प डालते हुए पढ़ें :—

सं वः सृजामि हृदयं संसृष्टं मनो अस्तु वः। संसृष्टास्तन्वः सन्तु वः। संसृष्टः प्राणो अस्तु वः ॥ सं यावः प्रियास्तन्वः सं प्रिया हृदयानि वः आत्मा वो अस्तु सं प्रियः सं प्रियस्तन्वो मम ॥

इसी जल के छींटे सत्रपुतलो वटुकनाथ को देकर पढ़ें :—'जीवदानं'

र धूप धमा अश्विनः प्राणस्तौ ते प्राणं दत्तां तेन जीव। मित्रा-वरुणयोः प्राणस्तौ ते प्राणं दत्तां तेन जीव। बृहस्पतेः प्राणाः स ते प्राणं ददातु तेन जीव ॥ समस्त शिवरात्रिदेवताभ्यः जीवादानं परिकल्पयामि नमः ॥

अक्षत सहित दर्भ के दो तिनके सीधे पकड कर यह मन्त्र तीन बार पढ़ें :

ॐ भूः पुरुषमावाहयामि नमः। ॐ भुवः पुरुषमावाहयामि नमः। ॐ स्वः पुरुषमावाहयामि नमः ३।

गायत्री मन्त्र तीन बार पढ़ें :—

ॐ भूर्भुवस्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॐ ३ ॥ यह मन्त्र भी तीन बार पढ़ें :—

ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् ३ । ॐ तत्सद्ब्रह्म अद्य तावत् तिथौ अद्य फाल्गुणमासस्य कृष्ण-पक्षस्य तिथौ महापर्वणि द्वादश्यां परतः त्रयोदश्यां भौमवासरान्वि-तायां । भगवतः भवस्य देवस्य, शर्वस्य देवस्य, पशुपतेः देवस्य, उग्रस्य देवस्य, भीमस्य देवस्य, ईशानस्य देवस्य, महादेवस्य पार्वती-सहितस्य परमेश्वरस्य, देवीपुत्रवटुकनाथस्य कालरात्र्याः तालरात्र्याः शिवरात्र्याः समस्तशिवरात्रिदेवतानां अर्चामहं करिष्ये । ॐ कुरुष्व ॥

दर्भ के तिनकों को निर्माल के पात्र में छोड कर । तिल सर्षप और जव को भी कन्धों पर से फेंके, अब शंकरमूर्ति के सामने दर्भ के दो दो तिनके आसन के लिये डालते हुए पढ़ें ।—

विश्वेश्वर महादेव राजराजेश्वरेश्वर आसनं दिव्यमीशान दास्येहं परमेश्वर ॥ भगवतः भवस्य देवस्य, ईशानस्य देवस्य महा-देवस्य पार्वतीसहितस्य परमेश्वरस्य इदमासनं नमः ।

सब वटुक आदि के सामने दो दो दर्भकांड डाल कर पढ़ें :—

देवपुत्रवटुकनाथस्य कालरात्र्याः तालरात्र्याः शिवरात्र्याः समस्त-शिवरात्रिदेवतानां इदमासनं नमः ।

चावल सहित दर्भ के दो तिनके अनामिका और मध्यमा पर अंगूठे से दबा कर घण्टा बजाते हुए पढ़ें : —

भगवते भवाय देवाय, शर्वाय देवाय, उग्राय देवाय, पशुपतये देवाय, रुद्राय देवाय, भीमाय देवाय, ईशानाय देवाय, ईश्वराय, देवाय, महादेवाय, पार्वतीसहिताय परमेश्वराय, देवीपुत्रवटुकनाथाय कालरात्र्यै तालरात्र्यै समस्तशिवरात्रिदेवताभ्यः युष्मान्पूजयामि । ॐ पूजय ॥

चावलों को कन्धों पर से फेंक कर हाथ में पहले से रखे हुए दर्भ के तिनकों को नये चावल समेत पकड़ कर घण्टी बजाते हुए पढ़ें :—

भगवन्तं भवं देवं, शर्वं देवं, रुद्रं देवं, पशुपतिं देवं, उग्रं देवं भीमं देवं, ईशानं देवं, ईश्वरं देवं महादेवं पार्वतीसहितं परमेश्वरं देवीपुत्रवटुकनाथं कालरात्रीं तालरात्रीं शिवरात्रीं समस्त शिवरात्रि-देवता आवाहयिष्यामि ।। ॐ आवाहय ।।

शंकर की मूर्ति पर फूल चढा कर पढ़ें :—

लिङ्गेऽद्य भक्तदयया क्षणमात्रमेकं स्थानं विधाय भव, मद्विहितां पुरारे ! सर्वेश ! विश्वमय ! हृत्कमलादिरूढ ! पूजां गृहाण भगवन्भव मेऽद्य तुष्टः ।। भूमेर्जलाच्च पवनादनलाद्विमांशोरुष्णार्चिषो हृदयतो गगनात्समेत्य लिङ्गेऽद्य सन्मणिमये मदनुग्रहार्थं भक्त्यैकलभ्य ! भगवन् ! कुरु सन्निधानम् ।। भगवन् ! पार्वतीनाथ ! भक्ता-नुग्रहकारक ! अस्मद्यानुरोधेन सन्निधानं कुरु प्रभो ।।

दोनों हाथों में मुठ्ठी भर फूल उठाकर और तीन बार गायत्रीमन्त्र पढ़ कर शंकर की मूर्ति पर चढायें : –

इत्यावाह्य तु गायत्रीं त्रिसमुच्चार्य तत्त्ववित् । मनसा चिन्ति-तैर्द्रव्यैर्देवमात्मनि पूजयेत् । तेजोरूपं ततः क्षिप्त्वा प्रतिमायां पुनर्यजेत् ।

दोनों कन्धों से जव फेंक कर प्राणायाम करे और नारीकचलो अथवा खोसू में जल डालते हुए पढ़ें :—

पाद्यार्थमुदकं नमः । शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शं योरभिस्रवन्तु नः ।। नमस्कार—भगवन्तः पाद्यं पाद्यम् ।।

इसी जलको पहले शंकर पर और फिर वटुकनाथ पर डालते हुए पढ़ें :—

महादेव महेशान महानन्द परात्पर गृहाण पाद्यं मद्दत्तं पार्वती-परमेश्वर ।। भगवते भवाय देवाय, पार्वतीसहिताय परमेश्वराय, देवीपुत्रवटुकनाथाय, कालरात्र्यै तालरात्र्यै शिवरात्र्यै समस्तशिवरात्रि-

देवताभ्यः पाद्यं नमः ।

इस पाद्य से बचा हुआ जल निर्माल्य पात्र में छोड़ें और नारीकचलो में जल डालते हुए पढ़ें :—

शन्नो देवीरभीष्टय आपो भवन्तु पीतये । शं योरभिस्रवन्तु नः ।

दर्भ, जल दूध, घी, दही, चावल, जव, सर्षप, यह आठ वस्तु इकठ्ठे अर्घ्य कहलाते हैं इन सब को स्रोसू में डालकर यह मन्त्र पढ़ें और यही जल की धारा शंकर और वटुक पर छोड कर पढ़ें :--

भगवन्तोऽर्घ्यमर्घ्यम् ॥ त्र्यम्बकेश सदाधार विपदां प्रतिघातक अर्घ्यं गृहाण देवेश सम्पत्सर्वार्थसाधक ॥ भगवान् भवदेव पार्वती-सहितपरमेश्वर देवीपुत्रवटुकनाथ, कालरात्रि तालरात्रि राज्ञिरात्रि शिवरात्रि समस्तशिवरात्रिदेवताः इदं वोऽर्घ्यं नमः ॥

अब भगवान् शंकर को पञ्चदशस्नान कीजिये - जल, दूध, दही, शहद घी, गन्ना, सर्वौषधि, धान्य के फल, फूल, सोना, रत्न, सर्षप, धान, सुगन्धद्रव्य, इन सब को मिला कर शंकर महाराज पर जल की धारा डालते हुए नीचे लिखे मन्त्र पढ़ें :—

(१) असङ्ख्याताः सहस्राणि ये रुद्रा अधि भूम्याम् । तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ (२) योऽस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि । तेषां स० ॥ (३) ये नीलग्रीवाः शितिकण्ठा दिवं रुद्रा उपाश्रिताः । तेषां स० ॥ (४) ये नीलग्रीवाः शितिकण्ठा शर्वा अधः क्षमाचराः । तेषां स० ॥ (५) ये वनेषु शष्पिञ्जरा नीलग्रीवा विलोहिताः । तेषां स० ॥ (६) ये ऽन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् । तेषां स० ॥ (७) ये भूतानामधिपतयो विशिखासः कपर्दिनः । तेषां स० ॥ (८) ये पथीनां पथिरक्षय ऐलवृदा यव्युधः । तेषां स० ॥ (९) ये तीर्थानि प्रचरंति सृकावन्तो निषङ्गिणः । तेषां स० ॥ (१०) य एतावन्तो वा भूयांसो वा दिशो रुद्रा वितस्थिरे ।

तेषां स० ।। (११) नमो अस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवस्ते-
तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः ते
भ्यो नमो अस्तु ते नो मृ७यन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां
जम्भे दधामि । (१२) नमो अस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वात
इषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः
तेभ्यो नमो अस्तु ते० (१३) नमो अस्तु रुद्रेभ्यो ये पृथिव्यां येषा-
मन्नमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतिचीर्दशोदीचीर्द-
शोर्ध्वाः । तेभ्यो नमो अस्तु ते न मृ७यन्तु ते यं द्विष्मो यश्च नो
द्वेष्टि तमेषां जम्भे दधामि । (१४) ॐ भूर्भुवःस्वः । क्षुच्च
शुक्चोष्णाचोग्रा च भीमा च राष्ट्रा च बीभत्सा च वैशन्ता च शार्दू-
लाका चानिराका चामीवाचानाहुतिश्च निर्ऋतिरेतास्ते अग्नेवर्ति-
मती–स्तन्वस्ताभिस्तङ्गच्छ योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमर्पय ।
यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो वनस्पतिषु । यो रुद्रो
विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु देवाः । भगवते
भवाय देवाय उमासहिताय शिवाय पार्वतीसहिताय परमेश्वराय
पञ्चदश स्नानं परिकल्पयामि नमः ।।

देवता पितर इत्यादि के लिये चावल, दही, तिल, शहद और घी सहित जल से तर्पण करते हुए पढ़ें :

ब्रह्मादयादेवास्तृप्यन्ताम् । कण्ठोपवीती (गले में यज्ञोपवीत रख कर पढ़ें) सनकादयः ऋषयः तृप्यन्ताम् ।।

यज्ञोपवीत बाईं तरफ रख कर पढ़ें :—

अपसव्येन अग्निष्वात्तादयः पितरः (तीन बार कहें) तृप्यन्ताम् ।

सव्येन–(यज्ञोपवीत दायां रख कर पढ़ें) ॐ नमो देवेभ्यः । कण्ठोपवीती (यज्ञोपवीत गले में) स्वाहा ऋषिभ्यः । अपसव्येन—

(बायां यज्ञोपवीत) स्वधापितृभ्यः । सव्येन—(दायां यज्ञोपवीत) आब्रह्मस्तम्भपर्यन्तं ब्रह्माण्डं सचराचरं जगत्तृप्यतु ३ ॥

नारीकचलो के शुद्ध जल से शंकर भगवान् को फिर से स्नान करायें :–

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् । शिवरात्रि देवाताभ्यः मन्त्रगुडकं नमः ।

बायें हथेली के मध्य में थोडा सा चावलों समेत जल लेकर और उसी हाथ की तर्जनी और अंगूठे के सिरों से चावल भी पकडकर बायें हाथ को देवता के चारों ओर घुमा कर उस जल और चावलों को अपने बायें कन्धे पर से फेंक देवें :—

आरात्रिका—(आलत) गृह्णन्तु भगवद्भक्ता भूताः प्रासादवाह्य पंचभूताश्च ये भूतास्तेषामनुचराश्चये ते तृप्यन्तु वौषट् । भगवते भवाय देवाय पार्वतीसहिताय परमेश्वराय शिवरात्रिदेवताभ्यः आरात्रिकां परिकल्पयामि नमः ।

दायें अंगूठे तथा तर्जनी से शिवमूर्ति का स्पर्श करके अपने नेत्रों से लगा कर पढ़ें :—

भवाय देवाय, उमासहिताय शिवाय पार्वतीसहिताय परमेश्वराय नेत्रस्पर्शनं नमः ।

अब जहां शंकर की मूर्ति को बिठाना हो वहां फूलों से आसन सजा कर यह पढ़ें :—

आसनाय नमः वृषभानाय नमः शतदलपद्मासनाय नमः सहस्रदलपद्मासनाय नमः ।

अब सोने के वर्कों और फूलों की मालाओं से शंकर भगवान् तथा वटुकनाथ को सजा कर महिम्नापार तथा देवी के श्लोक भक्ति से पढ़ें । फूल चढायें । महिम्नापार के कुछ श्लोक यह हैं ।

ॐ महिम्नः पारं ते परमविदुषो यद्यऽसदृशी स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः । अथाऽवाच्यः सर्वः स्वमतिपरिणामा

वधि गृणन्ममाप्येष स्तोत्रे हरनिरपवादः परिकरः ।।

हरिस्ते साहस्रं कमलबलिमादाय पदयोर्यदेकोने तस्मिन्निजमुद-हरन्नेत्रकमलम् । गतोभक्त्युद्रेकः परिणतिमसौ चक्रवपुषस्त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम् ।।

वपुष्प्रादुर्भावादनुमितमिदं जन्मनि पुरा । पुरारे ! नैवाहं क्वचिदपि भवन्तं प्रणतवान् । नमन्मुक्तः सम्प्रत्यतनुरहमग्रे प्यनतिमान् । महेश ! क्षन्तव्यं तदिदमपराधद्वयमपि ।।

देवी के श्लोक—ये देवि ! दुर्धरकृतान्तमुखान्तरस्था । ये कालि ! कालघनपाशनितान्त-बद्धाः । ये चण्डि चण्डगुरुकल्मष-सिन्धुमग्नास्तान्पासि मोचयसि तारयसि स्मृतैव ।।

लक्ष्मीवशीकरणचूर्णसहोदराणि त्वत्पादपङ्कजरजांसि चिरं जयन्ति । यानि प्रणाममिलितानि नृणां ललाटे लुम्पंति दैवलिखितानि दुराक्षराणि ।।

यावत्पदं पदसरोजयुगं त्वदीयं नाङ्गीकरोति हृदयेषु जगच्छरण्ये । तावद्विकल्प-जटिलाः कुटिलप्रकारा स्तर्कग्रहाः समयिनां प्रलयं न यान्ति ।।

शंकर पर वस्त्र के रूप में फूल चढा कर यह श्लोक पढ़ें :—

कालाग्निरुद्र सर्वज्ञ वरदाभयदायक वस्त्रं गृहाण देवेश दिव्य-वस्त्रोपशो-भित ।। समस्त–शिवरात्रिदेवताभ्यः वस्त्रं परिकल्पयामि नमः ।।

फिर यज्ञोपवीत के रूप में पुष्प चढा कर पढ़ें :—

यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् । आयुष्य-मग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः । समस्त शिवरात्रि-देवताभ्यः यज्ञोपवीतं परिकल्पयामि नमः ।।

शंकर की मूर्ति वटुकनाथ और भी पात्रों को तिलक लगाकर शंकर को चन्दन और बाकी पात्रों को सिन्दूर लगाते हुए पढ़ें : —

त्रिपुरान्तक देवेश पार्वतीप्राणवल्लभ गृहाण गन्धं काश्मीर-चन्द्रचन्दन कल्पितम् । भगवते भवाय देवाय, महादेवाय, ईशानाय देवाय । उमासहिताय शिवाय, पार्वतीसहिताय परमेश्वराय, देवी-पुत्रवटुकनाथाय, कालरात्र्यै, तालरात्र्यै शिवरात्र्यै समस्तशिवरात्रि-देवताभ्यः समालभनं गन्धो नमः ।

तिलकवाली उंगली को धोकर और चावल, बिलपत्र, पुष्प चढ़ायें :—

सदाशिव शिवानन्द प्रधान करुणेश्वर । पुष्पाणि बिल्वपत्रादिवि-चित्राणि गृहाण मे । भगते भवाय देवाय । उमासहिताय शिवाय । पार्वतीसहिताय परमेश्वराय । देवीपुत्रवटुकनाथाय, कालरात्र्यै, तालरात्र्यै, शिवरात्र्यै, समस्तशिवरात्रिदेवताभ्य : अर्घो नमः पुष्पं नमः

खड़े होकर घण्टा बजाते धूप चढा कर पढ़ें :—

महादेव मृडानीश जगदीश निरञ्जन धूपं गृहाण देवेश साज्यं गुग्गुलकल्पितम् । समस्त शिवरात्रिदेवताभ्यः धूपं करिकल्पयामि नमः

रत्नदीप और कपूर चढाते हुए पढ़ें : —

हिरण्यबाहो सेनानीर्गिरीश गिरजापते । दीपं गृहाण कर्पूर-कपिलाज्यत्रिवर्तकम् । समस्तशिवरात्रिदेवता—भ्यः रत्नदीपं कपूरं परिकल्पयामि नमः ॥

चामरम्—चामरं रजनीनाथ मरीचिप्रभमुत्तमम् । हेमदण्डयुतं देव गृहाण गिरिजापते । समस्त शिवरात्रिदेवताभ्यश्चामरं परि-कल्पयामि नमः ।

फूलों का छत्र चढा कर पढ़ें—नवरत्नमयं दिव्यं मुक्ताजाल-विभूषितम् गृहाण छत्रं भगवञ्छिव भद्रासनप्रद । समस्त शिवरात्रि-

देवताभ्यः छत्रं परिकल्पयामि नमः ।

आईना दिखा कर पढ़ें—एताभ्यः समस्तशिवरात्रिदेवताभ्यः आदर्शं परिकल्पयामि नमः ।

एताभ्यः समस्तशिवरात्रिदेवताभ्यः वासो नमः ।

नमस्कार करते हुए पढ़ें :—

एतासां देवतानामर्घ्यदानाद्यर्चनविधिः सर्वः परिपूर्णोऽस्तु ।

दूध व कन्द वटुक में डाल कर पढ़ें :—

क्षीराज्यमधुसंमिश्रं शुभ्रदध्ना समन्वितम् । षड्रसैश्च समायुक्तं गृहाणान्नं निवेदये । समस्तशिवरात्रिदेवताभ्यः मात्रामधुपर्कं चरुं नमो नैवेद्यं निवेदयामि नमः ।

फूलों की अञ्जलि चढ़ा कर पढ़े :—

हर विश्वाखिलाधार निराधार निराश्रय पुष्पाञ्जलिमिमं शम्भो गृहाण वरदो भव । समस्तशिवरात्रिदेवताभ्यः पुष्पाञ्जलिं समर्पयामि नमः ।

मन से आधा परिक्रमा करके :—

यानि कानि च पापानि ब्रह्महत्यादिकानि च । तानि तानि प्रणश्यन्ति शिवस्यार्धप्रदक्षिणात् ।

शंकर तथा वटुकनाथ पर श्रद्धा से पुष्प चढा कर पढ़ें :—

नागेन्द्रहाराय त्रिलोचनाय भस्माङ्गरागाय महेश्वराय । देवाधिदेवाय दिगम्बराय तस्मै नकाराय नमः शिवाय ।

मातङ्गचरमाम्बर-भूषणाय समस्तगीर्वाण गणार्चिताय त्रैलोक्य नाथाय पुरान्तकाय तस्मै मकाराय नमः शिवाय ।

शिवांमुखाम्भोजविकासनाय दक्षस्य यज्ञस्य विनाशकाय चन्द्रार्क वैश्वानरलोचनाय तस्मै शिकाराय नमः शिवाय ।

वशिष्ठकुम्भोत्-भवगौतादि-मुनीन्द्रवन्द्याय गिरीश्वराय, श्रीनीलकण्ठाय वृषध्वजाय तस्मै वकाराय नमः शिवाय ।

यज्ञस्वरूपाय जटाधराय पिनाकहस्ताय सनातनाय, नित्याय शुद्धाय निरञ्जनाय तस्मै यकाराय नमः शिवाय ।

आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो । यत् यत् कर्म करोमि तत् तत् अखिलं शम्भोस्तवाराधनम् ।

उभाम्यां जानुभ्यां पाणिभ्यां शिरसा उरसा वचसा नमस्कारं करोमि नमः ।

अब चावल वगैरा को संकल्प करते हुए पढ़ें—

अन्नं नमः २ आज्यं २ अन्नमद्यदिने अद्ययथा सकल्पात्सिद्धिरस्तु अन्नहीनं क्रियाहीनं विधिहीनं द्रव्यहीनं मन्त्रहीनं यद्गतं तत्सर्वमच्छिद्रं सम्पूर्णमस्तु । एवमस्तु

नारीकचलो खोसू में दाईं हाथ की उंगलियों से जल छोड कर उसी जल से शंकर तथा वटुक पर आचमन दे कर पढ़ें :—

शं नो देवीरभिष्टय आपो भवन्तु पीतये शं योरभि स्रवन्तु नः । समस्त शिवरात्रिदेवताभ्यः अपोशानं नमः आचमनीयं नमः ।

फिर उपरकी तरह नरीकचलों में दायें हाथ की उंगलियों से जल छोड़ कर उसी जल में दक्षिणा (तिल, सोना, चान्दी, सोने का सिक्का और जल) रखकर इन सब चीजों को अर्पण करें :—

पुनः शं नो देवीरभिष्टय आपो भवन्तु पीतये । शं योरभि स्रवन्तु नः समस्त शिवरात्रिदेवताभ्यो दक्षिणायै तिल हिरण्य रजत निष्कर्णं ददानि ।

फिर चावल तथा दक्षिणा अर्पण करके पढ़ें :—

एता देवताः सदक्षिणान्नेन प्रीयन्ता प्रीताः सन्तु ।

वटुकनाथ को फूल चढ़ा कर पढ़ें :—

नाथं नाथं त्रिभुवननाथ भूतिसितं त्रिशूलधरं । उपवीतीकृतभोगिनमिन्दुकलाशेखरं वन्दे ।

१०८ बार इस मंत्र का उच्चारण करें :—

शिवाय नमः ॐ शिवाय नमः ॐ शिवाय नमः ॐ नमः शिवाय ।

❁ वैश्वदेव विधि ❁

अग्नि जला कर उसके दक्षिण पश्चिम कौने पर विष्टर, तिल और चावल पानी सहित पात्र 'खोसू' या कवली रखें—इस पात्र को प्रणीतपात्र कहते हैं। प्रणीतपात्र में तीन वार फूल डाल कर पढ़ें।

सं वः सृजामि हृदयं संसृष्टं मनो अस्तु वः ।१। संसृष्टास्तन्वः सन्तु वः संसृष्टः प्राणो अस्तु वः ।२। संय्यावः प्रियास्तन्वः संप्रिया हृदयानिवः । आत्मा वो अस्तु संप्रियः संप्रियास्तन्वो मम ।३।

दर्भ के दो तिनके अग्नि में जला कर पढ़े—

निर्दग्धं रक्षो निर्दग्धारातिरपाग्ने । अग्निमामादं जहि निष्क्रव्यादं सीधा देवयजनं वह ।

दर्भ के दो तिनके जला कर दाईं तरफ छोड़ कर और प्राणायाम करके अग्नि को प्रणीत पात्र के जल से नो बार छिड़कते हुए पढ़ें—

ऋतं त्वा सत्येन परिसमूह्यामि ।१। सत्यं त्वर्तेन परिसमूह्यामि ।२। ऋतसत्याभ्यां त्वा परिसमूह्यामि ।३। ऋतं त्वा सत्येन पर्युक्षामि ।४। सत्यं त्वर्तेन पर्युक्षामि ।५। ऋतसत्याभ्यां त्वा पर्युक्षामि ।६। ऋतं त्वा सत्येन परि-षिञ्चामि ।७। सत्यं त्वर्तेन परिषिञ्चामि ।८। ऋतसत्याभ्यां त्वा परिषिञ्चामि ।९।।

अग्नि की चारों तरफ दर्भ के चार काण्ड पूर्व, दक्षिण, उत्तर, पश्चिम से छोड़ते हुए पढ़ें—

यज्ञस्य सन्ततिरसि यज्ञस्य त्वा सन्तत्यै स्तृणामि ।

अग्नि को तिल, फूल चढ़ा कर पढ़ें—

अग्नये शुकारूढाय स्वाहासहिताय पावकाय त्रिनेत्राय तेजोरूपाय शक्तिहस्ताय समालभनं गन्धो नमः अर्घो नमः पुष्पं नमः ।।

घी सहित पकाये हुए अन्न या रोटी पर दर्भ के दो तिनके जलते हुए लगा कर पढ़ें—

वैश्वदेवस्य सिद्धस्य सर्वतोऽग्यूस्य अन्नस्य जुहोतिपाकस्य घृतेन संलिप्य स्वस्त्यस्तु मृतमभिघार्य ॥

इसी अन्न या रोटी से अग्नि में आहुतियां डाल कर पढ़ें—

अग्नये स्वाहा । उत्तर की तरफ छोड़ें—सोमाय स्वाहा ।

दक्षिण की तरफ छोड़ें और इसके बाद अग्नि के मध्य में छोड़कर पढ़ें—

मित्राय स्वाहा, वरुणाय स्वाहा, इन्द्राय स्वाहा, इन्द्राग्निभ्यां स्वाहा, विश्वेभ्योदेवेभ्यः स्वाहा, प्रजापतये स्वाहा, अनुमत्यै स्वाहा, ध्वान्वन्तरये स्वाहा, वास्तोष्पतये स्वाहा वासुदेवाय स्वाहा लक्ष्मी-सहिताय नारायणाय स्वाहा ॥

बर्तन में सिलोना सहित रोटी आदि रख कर और परिवार सहित नैवेद्य को हाथों से पकड़ कर घण्टा शंख बजा कर प्रेप्पुन पढ़ें—

ॐ तत्सद्ब्रह्म अद्यतावत् तिथौ अद्य फाल्गुणमासस्य कृष्ण-पक्षस्य तिथौ द्वादश्यां रविवासरान्वितायां शिवरात्रिव्रतनिमित्त ॐ नमो नैवेद्यं निवेदयामि नमः ॥

अग्नि के दाईं तरफ पूर्व की ओर सिरे वाले दर्भ बिछा कर पढ़ें—

पूर्वाग्रान्दर्भानास्तीर्य ।

उसी बिछाई हुई दर्भ पर दक्षिण पश्चिम कोन से लाइन में सर्प के आकार में रोटी के तीन तीन टुकड़े एक दूसरे पर इसी प्रकार रख कर छत्तीस देवताओं को बलि देवें और आगे लिखे हुए एक एक नाम से प्रत्येक बार रोटी का टुकड़ा या अन्न रख कर पढ़े—

तक्षाय नमः, उपतक्षाय नमः, अम्बानामासि नमस्ते, दुला-नामासि नमस्ते, नितंत्रीनामासि नमस्ते, चुपनीकानामासि नमस्ते अभ्रयन्ती नामासि नमस्ते मेघयन्तीनामसि नमस्ते वर्षयन्तीनामासि

नमस्ते, नन्दिन्यै नमस्ते, सुभगे नमस्ते, सुमङ्गलि नमस्ते, भद्रङ्करि नमस्ते, श्रियै हिरण्यकेश्यै नमः, वनस्पतिभ्यो नमः, १५ धर्माय नमः, अधर्माय नमः, मृत्यवे नमः, मरुद्भ्यो नमः, वरुणाय नमः, विष्णवे नमः, वैश्रवणायराज्ञे नमः, भूतेभ्यो नमः इन्द्राय नमः, इन्द्रपुरुषेभ्यो नमः, सोमाय नमः, सोमपुरुषेभ्यो नमः वरुणाय नमः, ३० वरुणपुरुषेभ्यो नमः. ब्रह्मणे नमः, ब्रह्मपुरुषेभ्यो नमः, "ऊर्ध्वे" आकाशाय नमः "स्थण्डिले" दिवञ्चरेभ्योभूतेभ्यो नमः, नक्तञ्च-रेभ्यो भूतेभ्यो नमः ३६ शट्त्रिंशत्तत्वादिभ्योऽन्नं नमः आचमनीयं नमः ॥

बायां यज्ञोपवीत करके दायें तरफ सिर वाले दर्भ बिछा कर पढ़ें—

अपसव्येन । दक्षिणाग्रान्दर्भानास्तीर्य ।

दर्भ पर तिल और जल से छींटे देकर पढ़े—

समस्तमातापितृभ्यो द्वादशदैवतेभ्यः पितृभ्यो भूपृष्टे दर्भास्तरणे तिलोदकेन अवनेजनं स्वधा ॥

दर्भ पर बिछाये हुए इसी अन्न पर अंगूठे से स्पर्श करके पढ़ें—

उशन्तस्त्वा हवामह उशन्तः समिधीमहि । उशन्नुशत आवह पितृन्हविषे अत्तवे ॥

तिल, पानी, दूध, दीप, धूप, अन्न, घी और शहद यह आठ द्रव्य पितरों का अन्न है।

तिलास्तोयं तथा क्षीरं दीपधूपौ बलिस्तथा । मधुसर्पिः समायुक्तमष्टाङ्गमन्नसम्भवम् ॥

एक कवली में अन्न के टुकड़े रख कर तिल, जल, दूध इत्यादि डालें और बायां घुटना पृथ्वी पर रख कर पितरों का नाम उच्चारण करके कवली में रखा हुआ अन्न दर्भ पर रखते जायें और यह मन्त्र तीन बार पढ़ें—

देवताभ्यः पितृभ्यश्च महायोगिभ्य एवच । नमः स्वधा च

स्वाहा च नित्यमेव भवन्त्विह ॥३॥ तत्सद्ब्रह्म अद्यतावचिथौ फाल्गुणमासस्य कृष्णपक्षस्य तिथौ द्वादश्यां परतः त्रयोदश्यां मंगलवासरान्वितायां पितः एतत्ते-अन्नं ये च त्वानु ।

इसी तरह पितरों को मन्त्र पढ़ने के बिना ही अन्न देते जायें—

पितामह एतत्ते अन्नं ये च त्वानु । प्रपितामह एतत्ते अन्नं ये च त्वानु । मात एतत्ते अन्नं याश्चत्वाऽनु ।

इसी तरह मृत स्त्रियों के नाम ले कर अन्न रखते जायें और सभी मृतपितरों को अन्न दे कर जिन के नाम याद न हों रोटी के टुकडे अन्न आदि हाथ में ले कर यह मन्त्र पढ़ें—

मातृपक्ष्यास्तु ये केचिद्येचान्ये पितृपक्षजाः । गुरुश्वशुरबन्धूनां ये कुलेषु समुद्भवाः । ये प्रेतभावमापन्ना येचान्ये श्राद्धवर्जिताः अन्नदानेन ते सर्वे लभन्तां तृप्तिमुत्तमाम् । समस्त मातापितृभ्यो द्वादशदैवतेभ्यः पितृभ्योऽन्नं स्वधा ।

अन्न का लेप साफ करें— अन्नलेपं निवारयेत् ।

तिलक, फूल चढा कर पढ़ें—

समस्तमातापितृभ्यः समालभनं गन्धः स्वधा समस्तमाता पितृभ्यः अर्घ्यः स्वधा धूपः स्वधा ।

तर्पण करते हुए पढ़ें—

समस्तमातापितृभ्यः दीपः स्वधा धूपः स्वधा ।

भक्ष्य भोज्य रख कर पढ़ें—

समस्तमातापितृभ्यः भक्ष्यभोज्यफलमूल वलिर्नैवेद्यमाऽऽहारादि अन्नं स्वधा ॥

तिल, पानी, शहद छोड़ कर पढ़ें—

समस्तमातापितृभ्यः तिलमधुमिश्रमुदकपात्रमाचमनीयं जलं स्वाधा ।

तर्पण करके पढ़ें—

समस्तमातापितृभ्यः हिमपानंस्वधा क्षीरपानं स्वधा मधुपानं स्वधा तिलोदकं स्वधा उदकतर्पणं स्वधा हिमं हिमं रजतं रजतं ॥

दायां यज्ञोपवीत रख कर पढ़ें—

सव्येन—वसन्ताय नमः ग्रीष्माय नमः वर्षाभ्यो नमः शरदे नमः हेमन्ताय नमः शिशिराय नमः षड्ऋतुभ्यो नमः ।

अग्नि में अन्न की आहुति डाल कर पढ़ें—

अग्नये स्विष्टकृते स्वाहा ।

हाथ धोकर प्राणायाम करना और अग्नि को तीन बार छिड़कें—

ऋतंत्वा सत्येन विमुञ्चामि १। सत्यं त्वर्तेन विमुञ्चामि २। ऋतसत्याभ्यां त्वा विमुञ्चामि ३ ।

अग्नि के चारों तरफ छोड़ी हुई दर्भ उत्तर दिशा से उठा कर पढ़ें—

यज्ञस्य सन्ततिरसि यज्ञस्य त्वा सन्तत्यै नयामि॥

अग्नि को फूलों से आशीर्वाद मांगना ।

धर्मं देहि धनं देहि पुत्रपौत्रांश्च देहि मे । आयुरारोग्यमैश्वर्यं देहि मे हव्यवाहन । तेजोसि तेजो मयि देहि ।

अग्नि की ज्योति अपनी तरफ ले कर पढ़ें—

इत्यात्मानं देहि भगवन् सन्निधत्स्व ।

पृथिवी पर अन्न छोड कर पढ़ें—

भगवन् यक्ष्म एतत्ते ऽन्नं नमः एतत्ते आचमनीयं नमः ।

यज्ञोपवीत गले में रख कर पढ़ें—

कण्ठोपवीती—हन्तमनुष्येभ्यः । सनकादिभ्यऋषिभ्यः अन्नं नमः । आचमनीयं नमः ।

दायां यज्ञोपवीत रख कर चुद्द को हाथ से पकड़ें और तिलक पुष्प लगा कर पढ़ें—

या काचिद्योगिनी रौद्रा सौम्या घोरतरा परा । खेचरी भूचरी रामा तुष्टा भवतु मे सदा । आकाशमातृभ्योऽन्नं नमः । समालभनं

गन्धो नमः अर्घो नमः पुष्पं नमः।

शिवजी का ध्यान रख कर और पात्र में अन्न रख कर पढ़ें—

शिवरात्रिदेवताभ्यः बलिं समर्पयामि नमः।

अब दर्भ के बिना अन्नकर्मों के पास पृथ्वी पर और प्राणियों को अन्न दे कर पढ़ें—

गोग्रास, सौरभेय्यः स्वर्गहिताः पवित्राः पुण्यराशयः। प्रतिगृह्णन्तु मे ग्रासं गावस्त्रैलोक्यमातरः। गोभ्योन्नं नमः ऐन्द्रवारुणवायव्या याम्या नैर्ऋतिकाश्चये।. वायसाः प्रतिगृह्णन्तु इमं पिण्डं मयोद्धृतम्। काकेभ्योऽन्नं नमः। श्वानौ द्वा शावशवलौ वैवस्वतकुलोद्भवौ। ताभ्यां पिण्डं प्रदास्यामि स्यातामेतावहिंसकौ। श्वभ्यः श्वनकेभ्योऽन्नं नमः॥

बायां यज्ञोपवीत रख कर पढ़ें—

अपसव्येन। रौरवाधीनसत्वानां प्रेतद्वारनिवासिनाम्। अर्थिनां याचमानानामक्षय्यमुपतिष्ठतु।

दायां यज्ञोपवीत रख कर पढ़ें—

सव्येन। शुनां च पतितानां च श्वपचां पापरोगिणाम्। वायसानां क्रिमीणां च शनकैं निक्षिपेद्भुवि॥ देवा मनुष्या पशवो वयांसि सिद्धाः सयक्षोरगदैत्यसंघाः। प्रेता पिशाचास्तरवः समस्ता ये चान्नमिच्छन्ति, मया प्रदत्तम्॥ पिपीलिकाः कीटपतंगकाद्या बुभुक्षिताः कर्मणि बद्धबद्धाः। प्रयान्तु ते तृप्तिमिदं मयान्नं तेभ्यो विसृष्टं सुखिनो भवन्तु॥

येषां न माता न पिता न बन्धुर्नैवान्नसिद्धिर्न तथान्नमस्ति। तत्तृप्तयेऽन्नं भुवि दत्तमेतत्ते यान्तु तृप्तिं मुदिता भवन्तु। भूतानि सर्वाणि तथान्नमेतदयं चरिष्णुर्न ततोन्यदस्ति। तस्मादहं भूतनि-

कायभूतमन्नं प्रयच्छामि भवाय तेषाम् ॥ चतुर्दशो भूतगणो य एष तत्र स्थिता येऽखिलभूतसङ्घाः। तृप्त्यर्थमन्नं हि मया विसृष्टं तेषामिदं ते मुदिता भवन्तु ॥ इत्युच्चार्य नरो दद्यादन्नं श्रद्धासमन्वितः। भुवि भूतोपकाराय गृही सर्वाश्रयो यतः ॥

बायां यज्ञोपवीत रख कर अंगूठे की तरफ से अन्न सलोना सहित छोड़ कर पढ़ें—

अपसव्येन। यमाय धर्मराजाय मृत्यवे चान्तकाय च। वैवस्वताय कालाय सर्वप्राणहराय च ॥ औदुम्बराय नीलाय श्यनाय परमेष्ठिने। वृकोदराय भीमाय चित्रगुप्ताय वै नमः। पाशहस्तकृतान्ताय भूताधिपतये नमः। श्रीयमराजधर्मराजचित्रगुप्ततृप्तयेऽस्तु ॥

दायां यज्ञोपवीत रख कर 'पवित्र निकाल कर' अब डुलिजों और सन्निवारियों में ऋषिडुलिजों मे सतसोस दूध अन्न सलोना सहित डालते डालते पढ़ें—(केवल शिवरात्रि निमित)।

ये विश्वभाविनो भूता ये च तेष्वऽनुयायिनः। आहरन्तु बलिं तुष्टाः प्रयच्छन्तु शिवं मम ॥

योऽस्मिन्निवसति क्षेत्रे क्षेत्रपालः सकिङ्करः। तस्मै निवेदयाम्यद्य बलिं पानीयसंयुतम् ॥ चांक्षेत्राधिपतये बलि नमः रां राष्ट्राधिपतये बलिं नमः। सर्वे अभयवरप्रदा मह्यं पुष्टिं पुष्टिपतयो ददातु ॥

अपसव्येन ॥ आयुः प्रजां धनं विद्यां स्वर्गमोक्षौ सुखानि च। प्रयच्छन्तु तथा राज्यं नृणां प्रीताः पितामहाः ॥१॥

एष पिण्डो मया दत्तस्तव हस्ते जनार्दन। गयायां पितृरूपेण स्वयमेवोपगृह्यताम् ॥२॥

अत्मनश्चार्थलाभाय क्षेमाय विजयाय च । शत्रूणां बुद्धिनाशाय पितृनुद्धरणाय च ।३। पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिला । यत्र तत्र स्मरेन्नित्यं पितृणां दत्तमक्षयम् ।

❀ इति वैश्वदेवविधि ❀

दायां यज्ञोपवीत रख कर देवताओं का विसर्जन (शिवरात्रिविषयक) सव्येन—दर्भ के दो तिनके चावल सहित हाथ में रख कर पढ़ें—

ॐ भूः पुरुषं विसर्जयामि नमः ॐ भुवः पुरुषं विसर्जयामि नमः ॐ स्वः पुरुषं विसर्जयामि नमः ।३।

तीन बार पढ़ें—

ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् ।३।

ॐ तत्सद्ब्रह्म अद्यतावत् तिथौ अद्य फाल्गुणमासस्य कृष्णपक्षस्य द्वादश्यां सोमवासरान्वितायां भवस्य देवस्य उग्रस्य देवस्य भीमस्य देवस्य कालरात्र्याः तालरात्र्याः शिवरात्र्याः समस्त शिवरात्रिदेवतानामऽछिद्रं सम्पूर्णमस्तु एवमस्तु ।।

चावल सहित तर्पण करें—

एताभ्यो देवताभ्यो यवोदकं नमः उदकतर्पणं नमः ।।

प्रार्थना करते हुए पढ़ें—

आज्ञा मे दीयतां नाथ नैवेद्यस्यास्य भक्षणे । शरीरयात्रा सिद्ध्यर्थं भगवन् क्षन्तुमर्हसि ।।

आपन्नोस्मि शरण्योसि सर्वावस्थासु सर्वदा । भगवंस्त्वां प्रपन्नोस्मि रक्ष मां शरणागतम् ।।

हर शम्भो महादेव शरणागतवत्सल नान्यः त्रातासि मे कश्चित्

श्रुते त्वत् परमेश्वर । आशिरवान्तं निमग्नोस्मि दुस्तरे भव कर्दमे प्रसीद कृपया शम्भो पदाग्रेणोद्धरस्व माम् ।

यत्-कृतं यत्-करिष्यामि तत्-सर्वं न मया कृतम् । त्वया कृतं तु फलभुक्-त्वं-एव परमेश्वर ।

शब्द ब्रह्ममये स्वच्छे देवि त्रिपुरसुन्दरि । यथाशक्ति जपं पूजां गृहाण परमेश्वरि ।

दर्शनात्पापशमनी जपात्-मृत्युविनाशिनी । पूजिता दुःखदौर्भाग्यहरा त्रिपुरसुन्दरी ।

आह्वानं नैव जानामि नैव जानामि पूजनम् । पूजाभागं न जानामि क्षम्यतां परमेश्वर ।

अष्टाङ्ग प्रणाम करते हुए पढ़ें—

उभाभ्यां जानुभ्यां पाणिभ्यां शिरसा उरसा वचसा नमस्कारं करोमि नमः ।।

तर्पण करते हुए पढ़ें—

नमो ब्रह्मणे । नमो अस्-त्वग्नेये । नमः पृथिव्यै । नमः ओषधीभ्यः । नमो वाचे । नमो वाचस्पतये । नमो विष्णवे । बृहते कृणोमि इति-एतासामेत-देवतानां सामीप्यं सारिष्टतां सायुज्यं सलोकतां-आप्नोति य एवम्-एव-विद्वान् स्वाध्यायम्-अधीते ।

ॐ शान्तिः शान्तिः शान्तिः

अथ नैवेद्य मन्त्र (प्रेप्युन)

दोनों हाथों से नैवेद्यं ग्रहण करते हुये पढ़ें।

अमृतेशमुद्रयाऽमृतीकृत्य अमृतमस्तु अमृतायतां नैवेद्यं सावित्राणि सावित्रस्य देवस्य त्वा सवितुः प्रसवेऽश्विनो-र्बाहुभ्यां पूष्णो हस्ताभ्यामाददे, महागणपतये कुमाराय श्रियै सरस्वत्यै लक्ष्म्यै विश्वकर्मणे द्वारदेवताभ्यः प्रजापतये ब्रह्मणे कलशदेवताभ्यः ब्रह्मविष्णु - महेश्वरदेवताभ्यः चातुर्वेदेश्वराय ऋतुपतये नाराणाय दुर्गायै त्र्यम्बकाय वरुणाय यज्ञपुरुषाय अग्निष्वात्तादिभ्यः पितृगणदेवताभ्यः ॐ भगवते वासुदेवाय लक्ष्मीसहिताय नाराणाय, भवाय देवाय पार्वतीसहिताय परमेश्वराय विनाकाय वल्लभा-सहिताय श्रीगणेशाय क्लीं कां कुमाराय भगवते ह्रां ह्रीं सः सूर्याय प्रभासहिताय आदित्याय भगवत्यै अमायै कामायै चार्वङ्ग्यै टंकधारिण्यै तारायै पार्वत्यै यक्षिण्यै श्रीशारिकाभगवत्यै श्रीशारदाभगवत्यै श्रीमहा रज्ञीभगवत्यै श्रीज्वालाभगवत्यै व्रीढाभगवत्यै वैखरी-भगवत्यै गंगाभगवत्यै युमनाभगवत्यै कालिकाभगवत्यै

सिद्धलक्ष्म्यै महालक्ष्म्यै महात्रिपुरसुन्दर्यै सहस्रनाम्न्यै देव्यै भवान्यै अभयंकरीदेव्यै क्षेमंकरीभगवत्यै सर्व-शत्रुघातिन्यै इहराष्ट्राधिपतये अमुकभैरवाय इन्द्रादिभ्यो दशलोकपालेभ्यः आदित्यादिभ्यो नवग्रहदेवताभ्यः ब्रह्म ध्रुवाभ्यां अनन्तागस्त्याभ्यां ब्रह्मणे कूर्माय ध्रुवाय हरये लक्ष्म्यै शिख्यादिभ्यः पञ्च - चत्वारिंशद्वास्तोष्पतियाग-देवताभ्यः ब्रह्मादिभ्यः मातृभ्यः गौर्यादिभ्यः मातृभ्यः, ललितादिभ्यः मातृभ्यः दुर्गाक्षेत्रगणेश्वरदेवताभ्यः राका देवताभ्यः त्रिकादेवताभ्यः सिनी–वालीदेवताभ्यः यामी-देवताभ्यः रौद्रीदेवताभ्यः वारुणीदेवताभ्यः बार्हस्पत्य-देवताभ्यः। ॐ भूर्देवताभ्यः ॐ भुवो देवताभ्यः ॐ स्वर्देवताभ्यः ॐ भूर्भुवस्वर्देवताभ्यः अखण्डब्रह्माण्डयाग-देवाभ्यः महागायत्र्यै सावित्र्यै सरस्वत्यै हेरकादिभ्यः वटुकादिभ्यः उत्पन्नममृतं दिव्यं प्राक्क्षीरोदधिमन्थनात् अन्नममृतरूपेण नैवेद्यं प्रतिगृह्यताम् (इष्ट देवता का ध्यान करते हुये पढ़ें) :- तत्सद् ब्रह्म अद्यतावात् तिथौ अद्य अमुक मासस्य-अमुकपक्षस्य, तिथौ अमुकायां आत्मनो वाङ्मनः कायोपार्जितपापनिवारणार्थं ॐ नमो नैवेद्यं निवेदामि नमः।